# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 8 | गुणाः – ५० |
| विषयः – धर्मशास्त्रम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – मनुस्मृतिः ११-१२ अध्यायौ | |

**सूचना -** निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।
प्रत्येकं प्रश्नस्य समानगुणाः । (१०)

**प्रश्नः १ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या ।**

१ धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत् ।
वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ॥

२ यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति ।
तथा दुश्चरिते सर्वं वेदे त्रिवृत्तिमज्जति ॥

३ मानसं मनस्वैवायमुपभुङ्क्ते शुभाशुभम् ।
वाचा वाचा कृतं कर्म कायेनैव च कायिकम् ॥

**प्रश्नः २ उपपातकानां प्रायश्चित्तविधिं यथाग्रन्थं निरूपयत ।**

**प्रश्नः ३ सत्त्वरजस्तमसः गुणानां वर्णनं यथाग्रन्थं कुरुत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या ।**

१ चतुर्थकालमश्नीयादक्षारलवणं मितम् ।
गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः ॥

२ सुवर्णस्तेयकृद्विप्रो राजानमभिगम्यतु ।
स्वकर्म ख्यापयन् ब्रूयान् मां भवाननुशास्त्विति ॥

३ ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजेत् ।
मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च ॥

**प्रश्नः ५ अभक्ष्यभक्षणप्रायश्चित्तविधिं वर्णयत ।**

**प्रश्नः ६ ब्रह्महत्यायाः प्रायश्चित्तनिरूपणं कुरुत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ देवत्वं सात्विका यान्ति मनुष्यत्वं च राजसाः ।
तिर्यक्त्वं तामसा नित्यमित्येषां त्रिविधा गतिः ॥

२ वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियात्मचिन्ता च सात्विकं गुणलक्षणम् ॥

३ पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥

**प्रश्नः ८ द्वादशाध्यायस्य सङ्क्षिप्तवर्णनं वर्णयत ।**

**प्रश्नः ९ गुणानां प्रभावविषये ग्रन्थानुसारं लिखत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ दीपहर्ता किम् भवेत् ?
२ एकादशाध्याये कस्य वर्णनं वर्तते ?
३ सान्तपनं कृच्छ्रं नाम किम् ?
४ एकादशाध्याये कति श्लोकाः सन्ति ?
५ मानसं पापं कतिविधम् ?
६ शारीरं पापं कतिविधम् ?
७ आत्मनः कति गुणाः सन्ति ?
८ सुरापः ब्राह्मणः कस्मिन् योनौ सम्भवति ?
९ फलमूलचोरः किं भवति ?
१० धारिभ्यः के श्रेष्ठाः ?
११ ज्ञानिभ्यः के श्रेष्ठाः ?
१२ तपसा किं हन्ति ?
१३ मनुस्मृतौ कति अध्यायाः सन्ति ?
१४ प्रवृत्तं च निवृत्तिं कीदृशं कर्म ?
१५ ग्रन्थिभ्यः के श्रेष्ठाः ?
१६ ब्रह्महा किं प्राप्नोति ?

****